दिनाङ्क :- 10.08.2025

प्रात: - 06:55

<u>प्रधानमन्त्री-कर्नाटकः</u>

प्रधानमन्त्री नरेन्द्रमोदी अद्य कर्नाटकस्य एकदिवसीययात्रायै गमिष्यति । अत्रावसरे श्रीमोदी बेंगलुरुनगरस्य के-एस-आर-रेलस्थानके त्रिभ्यः वन्दे-भारत-द्रुतरेलयानेभ्यः हरितपताकां प्रदर्शयिष्यति। अवधेयास्पदमिदं यत् एतेषु रेलयानेषु बेंगलुरुतः बेलगामं यावत्, अमृतसरात् मातावैष्णोदेवी कटरां यावत्, तथैव नागपुरतः पुणेनगरं यावत् गम्यमानानि रेलयानानि सन्ति। अतः परं सः बेंगलुरुनगरे मेट्रोयानस्य येलो-लाइन इति पीतवर्णीयरेखायै हरितपताकां प्रदर्शयिष्यति। श्री मोदी आर. वी. रोड, रागीगुड्डा तः इलेक्ट्रॉनिक सिटी मेट्रो स्थानकं यावत् यात्रापि करिष्यति। प्रधानमन्त्री बेंगलुरुनगरे नगरीयसम्पर्कपरियोजनानाम् उद्घाटनं शिलान्यासञ्च विधाय एकां सार्वजनिकसभामपि सम्बोधयिष्यति। श्रीमोदी दशाधिक-षड्शतोत्तर-पञ्चदशसहस्त्रकोटिरुप्यतोऽप्यधिकानां बेंगलुरुमेट्रोयानस्य तृतीयचरणस्य परियोजनानाम् आधारशिलां स्थापयिष्यति । दक्षिण-पश्चिम रेलविभागस्य महाप्रबंधकेन मुकल चंद्र माथुर इत्यनेन उक्तं यत् हाई स्पीड वंदे भारत रेलयानं क्षेत्रीय संपर्कं सम्वर्धयिष्यति।

<u>निर्वाचनायोग:</u>

निर्वाचनायोगेन उक्तं यत् चतुःत्रिंशोत्तर त्रिशतं यावत् पञ्जीकृतानि अमान्यताप्राप्तराजनैतिकदलानि सूच्याः अपसारितानि, ये ऊनविंशत्यधिक द्विसहस्रात् षड्वर्षाणि यावत् एकस्यापि निर्वाचनस्य आवश्यकाः नियमाः न पूरिताः सन्ति। एतेषां दलानाम् कार्यालयानि अपि भौतिकरूपेण कुत्रापि न सन्ति। एतानि चतुःत्रिंशोत्तर त्रिशतं यावत् पञ्जीकृतानि अमान्यराजनैतिकदलानि देशस्य विभिन्नेभ्यः राज्येभ्यः, केन्द्रशासितप्रदेशेभ्यः च सन्ति ।

सिक्किम-हर घर तिरंगा :

सिक्किम-प्रशासनेन "हर घर तिरंगा" इत्यभियानम् सोत्साहेन परिपालनाय विस्तृताः पदाक्षेपाः स्वीकृताः। संस्कृतिविभागस्य वरिष्ठाधिकारिणः सूचितवन्तः यत् नागरिकेषु प्रायः एकलक्ष-राष्ट्रियध्वजाः वितरिताः भविष्यन्ति। संस्कृतिविभागः ध्वजाः मण्डलप्रशासनेभ्यः समर्पयिष्यति येन ते क्षेत्रेषु वितरितुं शक्नुवन्ति। अगस्तमासस्य द्वादश दिनाङ्के गङ्गटोक्-नगरस्य एम जी मार्गात् राज्यपालस्य मुख्यमन्त्रिणः च उपस्थितौ तिरङ्गा-सभायाः आयोजनं भविष्यति ।

पुटिन् -लुला

ब्राजील-देशस्य राष्ट्रपतिः लुइज् इनासिओ लुला दा सिल्वा ह्यः रूसदेशस्य राष्ट्रपतिना व्लादिमीर् पुटिन् इत्यनेन सह प्रायः चत्वारिंशत् निमेषान् यावत् भाषितवान् इति ब्रासिलियानगरस्य राष्ट्रपतिभवनेन उक्तम्। तेनोक्तं यत् पुटिन् तस्मै अमेरिकादेशेन सह वार्तायाः, युक्रेनदेशे युद्धसम्बद्धानां शान्तिप्रयासानां च विषये सूचितवान् । उदयमानानाम् अर्थव्यवस्थानां ब्रिक्स-समूहे सहकार्यस्य विषयेऽपि चर्चां कृत्वा वर्तमान-अन्तर्राष्ट्रीय-राजनैतिक-आर्थिक-स्थितेः समीक्षां कृतवन्तौ ।

बिहार - रग्बी :

बिहार-राज्यस्य राजगीरे आयोक्ष्यमाणे एशिया-रग्बी-अण्डर-२०-चैम्पियनशिप-सप्तम-क्रीडायां ह्यः उत्तम-प्रदर्शनेन विजयेन च सह भारतीय-महिला-दलं उपांत्यचक्रीय-क्रीडायां प्रविष्टम्। प्रथमे द्वन्द्वे कजाकिस्तानदेशं पराजित्य भारतीय क्रीडिकाः द्वितीयसङ्घर्षे यूएई-दलं पराजितवत्यः ।